# Jayanteya Gita from Shrimad Bhagavata

# જાયન્તેયગીતા શ્રીમદ્ભાગવતાન્તર્ગતા

## Document Information

Text title : jAyanteyagItA shrImadbhAgavatAntargatam

File name : jAyanteyagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Description-comments : Bhagavata Purana sknadha 11 adhyAya 2-5

Latest update : December 29, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2022

*sanskritdocuments.org*

Jayanteya Gita from Shrimad Bhagavata

# જાયન્તેયગીતા શ્રીમદ્ભાગવતાન્તર્ગતા

એકાદશસ્કન્ધે અધ્યાયાઃ ૨-૫

## દ્વિતીયોઽધ્યાયઃ - ૧૧.૨

શ્રીશુક ઉવાચ
ગોવિન્દભુજગુપ્તાયાં દ્વારવત્યાં કુરૂદ્વહ ।
અવાત્સીન્નારદોઽભીક્ષ્ણં કૃષ્ણોપાસનલાલસઃ ॥ ૧॥

કો નુ રાજન્નિન્દ્રિયવાન્ મુકુન્દચરણામ્બુજમ્ ।
ન ભજેત્સર્વતો મૃત્યુરુપાસ્યમમરોત્તમૈઃ ॥ ૨॥

તમેકદા તુ દેવર્ષિં વસુદેવો ગૃહાગતમ્ ।
અર્ચિતં સુખમાસીનમભિવાદ્યેદમબ્રવીત્ ॥ ૩॥

વસુદેવ ઉવાચ
ભગવન્ ભવતો યાત્રા સ્વસ્તયે સર્વદેહિનામ્ ।
કૃપણાનાં યથા પિત્રોરુત્તમશ્લોકવર્ત્મનામ્ ॥ ૪॥

ભૂતાનાં દેવચરિતં દુઃખાય ચ સુખાય ચ ।
સુખાયૈવ હિ સાધૂનાં ત્વાદૃશામચ્યુતાત્મનામ્ ॥ ૫॥

ભજન્તિ યે યથા દેવાન્ દેવા અપિ તથૈવ તાન્ ।
છાયેવ કર્મસચિવાઃ સાધવો દીનવત્સલાઃ ॥ ૬॥

બ્રહ્મંસ્તથાપિ પૃચ્છામો ધર્માન્ ભાગવતાંસ્તવ ।
યાન્ શ્રુત્વા શ્રદ્ધયા મર્ત્યો મુચ્યતે સર્વતોભયાત્ ॥ ૭॥

અહં કિલ પુરાનન્તં પ્રજાર્થો ભુવિ મુક્તિદમ્ ।
અપૂજયં ન મોક્ષાય મોહિતો દેવમાયયા ॥ ૮॥

યથા વિચિત્રવ્યસનાદ્ભવદ્ભિર્વિશ્વતોભયાત્ ।

મુચ્યેમ હ્યઞ્જસૈવાદ્ધા તથા નઃ શાધિ સુવ્રત ॥ ૯॥

શ્રીશુક ઉવાચ
રાજન્નેવં કૃતપ્રશ્નો વસુદેવેન ધીમતા ।
પ્રીતસ્તમાહ દેવર્ષિર્હરેઃ સંસ્મારિતો ગુણૈઃ ॥ ૧૦॥

નારદ ઉવાચ
સમ્યગેતદ્વ્યવસિતં ભવતા સાત્વતર્ષભ ।
યત્પૃચ્છસે ભાગવતાન્ ધર્માંસ્ત્વં વિશ્વભાવનાન્ ॥ ૧૧॥

શ્રુતોઽનુપઠિતો ધ્યાત આદૃતો વાનુમોદિતઃ ।
સદ્યઃ પુનાતિ સદ્ધર્મો દેવવિશ્વદ્રુહોઽપિ હિ ॥ ૧૨॥

ત્વયા પરમકલ્યાણઃ પુણ્યશ્રવણકીર્તનઃ ।
સ્મારિતો ભગવાનદ્ય દેવો નારાયણો મમ ॥ ૧૩॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
આર્ષભાણાં ચ સંવાદં વિદેહસ્ય મહાત્મનઃ ॥ ૧૪॥

પ્રિયવ્રતો નામ સુતો મનોઃ સ્વાયમ્ભુવસ્ય યઃ ।
તસ્યાગ્નીધ્રસ્તતો નાભિરૃષભસ્તત્સુતઃ સ્મૃતઃ ॥ ૧૫॥

તમાહુર્વાસુદેવાંશં મોક્ષધર્મવિવક્ષયા ।
અવતીર્ણં સુતશતં તસ્યાસીદ્બ્રહ્મપારગમ્ ॥ ૧૬॥

તેષાં વૈ ભરતો જ્યેષ્ઠો નારાયણપરાયણઃ ।
વિખ્યાતં વર્ષમેતદ્યન્નામ્ના ભારતમદ્ભુતમ્ ॥ ૧૭॥

સ ભુક્તભોગાં ત્યક્ત્વેમાં નિર્ગતસ્તપસા હરિમ્ ।
ઉપાસીનસ્તત્પદવીં લેભે વૈ જન્મભિસ્ત્રિભિઃ ॥ ૧૮॥

તેષાં નવ નવદ્વીપપતયોઽસ્ય સમન્તતઃ ।
કર્મતન્ત્રપ્રણેતાર એકાશીતિર્દ્વિજાતયઃ ॥ ૧૯॥

નવાભવન્ મહાભાગા મુનયો હ્યર્થશંસિનઃ ।
શ્રમણા વાતરશના આત્મવિદ્યાવિશારદાઃ ॥ ૨૦॥

કવિર્હરિરન્તરિક્ષઃ પ્રબુદ્ધઃ પિપ્પલાયનઃ ।
આવિર્હોત્રોઽથ દ્રુમિલશ્ચમસઃ કરભાજનઃ ॥ ૨૧॥

ત એતે ભગવદ્રૂપં વિશ્વં સદસદાત્મકમ્ ।

આત્મનોઽવ્યતિરેકેણ પશ્યન્તો વ્યચરન્મહીમ્ ॥ ૨૨॥

અવ્યાહતેષ્ટગતયઃ સુરસિદ્ધસાધ્ય-
    ગન્ધર્વયક્ષનરકિન્નરનાગલોકાન્ ।
મુક્તાશ્ચરન્તિ મુનિચારણભૂતનાથ-
    વિદ્યાધરદ્વિજગવાં ભુવનાનિ કામમ્ ॥ ૨૩॥

ત એકદા નિમેઃ સત્રમુપજગ્મુર્યદૃચ્છયા ।
વિતાયમાનમૃષિભિરજનાભે મહાત્મનઃ ॥ ૨૪॥

તાન્ દૃષ્ટ્વા સૂર્યસઙ્કાશાન્ મહાભાગવતાન્ નૃપ ।
યજમાનોઽગ્નયો વિપ્રાઃ સર્વ એવોપતસ્થિરે ॥ ૨૫॥

વિદેહસ્તાનભિપ્રેત્ય નારાયણપરાયણાન્ ।
પ્રીતઃ સમ્પૂજયાઞ્ચક્રે આસનસ્થાન્ યથાર્હતઃ ॥ ૨૬॥

તાન્ રોચમાનાન્ સ્વરુચા બ્રહ્મપુત્રોપમાન્ નવ ।
પપ્રચ્છ પરમપ્રીતઃ પ્રશ્રયાવનતો નૃપઃ ॥ ૨૭॥

વિદેહ ઉવાચ
મન્યે ભગવતઃ સાક્ષાત્પાર્ષદાન્ વો મધુદ્વિષઃ ।
વિષ્ણોર્ભૂતાનિ લોકાનાં પાવનાય ચરન્તિ હિ ॥ ૨૮॥

દુર્લભો માનુષો દેહો દેહિનાં ક્ષણભઙ્ગુરઃ ।
તત્રાપિ દુર્લભં મન્યે વૈકુણ્ઠપ્રિયદર્શનમ્ ॥ ૨૯॥

અત આત્યન્તિકં ક્ષેમં પૃચ્છામો ભવતોઽનઘાઃ ।
સંસારેઽસ્મિન્ ક્ષણાર્ધોઽપિ સત્સઙ્ગઃ શેવધિર્નૃણામ્ ॥ ૩૦॥

ધર્માન્ ભાગવતાન્ બ્રૂત યદિ નઃ શ્રુતયે ક્ષમમ્ ।
યૈઃ પ્રસન્નઃ પ્રપન્નાય દાસ્યત્યાત્માનમપ્યજઃ ॥ ૩૧॥

શ્રીનારદ ઉવાચ
એવં તે નિમિના પૃષ્ટા વસુદેવ મહત્તમાઃ ।
પ્રતિપૂજ્યાબ્રુવન્ પ્રીત્યા સસદસ્યર્ત્વિજં નૃપમ્ ॥ ૩૨॥

કવિરુવાચ
મન્યેઽકુતશ્ચિદ્ભયમચ્યુતસ્ય
પાદામ્બુજોપાસનમત્ર નિત્યમ્ ।

ઉદ્વિગ્નબુદ્ધેરસદાત્મભાવા-
દ્વિશ્વાત્મના યત્ર નિવર્તતે ભીઃ ॥ ૩૩॥

યે વૈ ભગવતા પ્રોક્તા ઉપાયા હ્યાત્મલબ્ધયે ।
અઞ્જઃ પુંસામવિદુષાં વિદ્ધિ ભાગવતાન્ હિ તાન્ ॥ ૩૪॥

યાનાસ્થાય નરો રાજન્ ન પ્રમાદ્યેત કર્હિચિત્ ।
ધાવન્ નિમીલ્ય વા નેત્રે ન સ્ખલેન્ન પતેદિહ ॥ ૩૫॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
 બુદ્ધ્યાત્મના વાનુસૃતસ્વભાવાત્ ।
કરોતિ યદ્યત્સકલં પરસ્મૈ
 નારાયણાયેતિ સમર્પયેત્તત્ ॥ ૩૬॥

ભયં દ્વિતીયાભિનિવેશતઃ સ્યા-
 દીશાદપેતસ્ય વિપર્યયોઽસ્મૃતિઃ ।
તન્માયયાતો બુધ આભજેત્તં
 ભક્ત્યૈકયેશં ગુરુદેવતાત્મા ॥ ૩૭॥

અવિદ્યમાનોઽપ્યવભાતિ હિ દ્વયો
 ધ્યાતુર્ધિયા સ્વપ્નમનોરથૌ યથા ।
તત્કર્મસઙ્કલ્પવિકલ્પકં મનો
 બુધો નિરુન્ધ્યાદભયં તતઃ સ્યાત્ ॥ ૩૮॥

શ઼ૃણ્વન્ સુભદ્રાણિ રથાઙ્ગપાણે-
 ર્જન્માનિ કર્માણિ ચ યાનિ લોકે ।
ગીતાનિ નામાનિ તદર્થકાનિ
 ગાયન્ વિલજ્જો વિચરેદસઙ્ગઃ ॥ ૩૯॥

એવંવ્રતઃ સ્વપ્રિયનામકીર્ત્યા
 જાતાનુરાગો દ્રુતચિત્ત ઉચ્ચૈઃ ।
હસત્યથો રોદિતિ રૌતિ ગાય-
 ત્યુન્માદવન્નૃત્યતિ લોકબાહ્યઃ ॥ ૪૦॥

ખં વાયુમગ્નિં સલિલં મહીં ચ
 જ્યોતીંષિ સત્ત્વાનિ દિશો દ્રુમાદીન્ ।
સરિત્સમુદ્રાંશ્ચ હરેઃ શરીરં

યત્કિં ચ ભૂતં પ્રણમેદનન્યઃ ॥ ૪૧॥

ભક્તિઃ પરેશાનુભવો વિરક્તિ-
રન્યત્ર ચૈષ ત્રિક એકકાલઃ ।
પ્રપદ્યમાનસ્ય યથાશ્નતઃ સ્યુ-
સ્તુષ્ટિઃ પુષ્ટિઃ ક્ષુદપાયોઽનુઘાસમ્ ॥ ૪૨॥

ઇત્યચ્યુતાઙ્ઘ્રિં ભજતોઽનુવૃત્ત્યા
ભક્તિર્વિરક્તિર્ભગવત્પ્રબોધઃ ।
ભવન્તિ વૈ ભાગવતસ્ય રાજં-
સ્તતઃ પરાં શાન્તિમુપૈતિ સાક્ષાત્ ॥ ૪૩॥

રાજોવાચ
અથ ભાગવતં બ્રૂત યદ્ધર્મો યાદૃશો નૃણામ્ ।
યથાઽઽચરતિ યદ્બ્રૂતે યૈર્લિઙ્ગૈર્ભગવત્પ્રિયઃ ॥ ૪૪॥

હરિરુવાચ
સર્વભૂતેષુ યઃ પશ્યેદ્ભગવદ્ભાવમાત્મનઃ ।
ભૂતાનિ ભગવત્યાત્મન્યેષ ભાગવતોત્તમઃ ॥ ૪૫॥

ઈશ્વરે તદધીનેષુ બાલિશેષુ દ્વિષત્સુ ચ ।
પ્રેમમૈત્રીકૃપોપેક્ષા યઃ કરોતિ સ મધ્યમઃ ॥ ૪૬॥

અર્ચાયામેવ હરયે પૂજાં યઃ શ્રદ્ધયેહતે ।
ન તદ્ભક્તેષુ ચાન્યેષુ સ ભક્તઃ પ્રાકૃતઃ સ્મૃતઃ ॥ ૪૭॥

ગૃહીત્વાપીન્દ્રિયૈરર્થાન્ યો ન દ્વેષ્ટિ ન હૃષ્યતિ ।
વિષ્ણોર્માયામિદં પશ્યન્ સ વૈ ભાગવતોત્તમઃ ॥ ૪૮॥

દેહેન્દ્રિયપ્રાણમનોધિયાં યો
જન્માપ્યયક્ષુદ્ભયતર્ષકૃચ્છ્રૈઃ ।
સંસારધર્મૈરવિમુહ્યમાનઃ
સ્મૃત્યા હરેર્ભાગવતપ્રધાનઃ ॥ ૪૯॥

ન કામકર્મબીજાનાં યસ્ય ચેતસિ સમ્ભવઃ ।
વાસુદેવૈકનિલયઃ સ વૈ ભાગવતોત્તમઃ ॥ ૫૦॥

ન યસ્ય જન્મકર્મભ્યાં ન વર્ણાશ્રમજાતિભિઃ ।
સજ્જતેઽસ્મિન્નહમ્ભાવો દેહે વૈ સ હરેઃ પ્રિયઃ ॥ ૫૧॥

ન યસ્ય સ્વઃ પર ઇતિ વિત્તેષ્વાત્મનિ વા ભિદા ।
સર્વભૂતસમઃ શાન્તઃ સ વૈ ભાગવતોત્તમઃ ॥ ૫૨॥

ત્રિભુવનવિભવહેતવેઽપ્યકુણ્ઠ-
    સ્મૃતિરજિતાત્મસુરાદિભિર્વિમૃગ્યાત્ ।
ન ચલતિ ભગવત્પદારવિન્દા-
    લ્લવનિમિષાર્ધમપિ યઃ સ વૈષ્ણવાગ્ર્યઃ ॥ ૫૩॥

ભગવત ઉરુવિક્રમાઙ્ઘ્રિશાખા-
    નખમણિચન્દ્રિકયા નિરસ્તતાપે ।
હૃદિ કથમુપસીદતાં પુનઃ સ
    પ્રભવતિ ચન્દ્ર ઇવોદિતેઽર્કતાપઃ ॥ ૫૪॥

વિસૃજતિ હૃદયં ન યસ્ય સાક્ષા-
    દ્ધરિરવશાભિહિતોઽપ્યઘૌઘનાશઃ ।
પ્રણયરશનયા ધૃતાઙ્ઘ્રિપદ્મઃ
    સ ભવતિ ભાગવતપ્રધાન ઉક્તઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

## તૃતીયોઽધ્યાયઃ - ૧૧.૩

રાજોવાચ
પરસ્ય વિષ્ણોરીશસ્ય માયિનામપિ મોહિનીમ્ ।
માયાં વેદિતુમિચ્છામો ભગવન્તો બ્રુવન્તુ નઃ ॥ ૧॥

નાનુતૃપ્યે જુષન્ યુષ્મદ્વચો હરિકથામૃતમ્ ।
સંસારતાપનિસ્તપ્તો મર્ત્યસ્તત્તાપભેષજમ્ ॥ ૨॥

અન્તરિક્ષ ઉવાચ
એભિર્ભૂતાનિ ભૂતાત્મા મહાભૂતૈર્મહાભુજ ।
સસર્જોચ્ચાવચાન્યાદ્યઃ સ્વમાત્રાત્મપ્રસિદ્ધયે ॥ ૩॥

એવં સૃષ્ટાનિ ભૂતાનિ પ્રવિષ્ટઃ પઞ્ચધાતુભિઃ ।
એકધા દશધાઽઽત્માનં વિભજન્ જુષતે ગુણાન્ ॥ ૪॥

ગુણૈર્ગુણાન્ સ ભુઞ્જાન આત્મપ્રદ્યોતિતૈઃ પ્રભુઃ ।
મન્યમાન ઇદં સૃષ્ટમાત્માનમિહ સજ્જતે ॥ ૫॥

કર્માણિ કર્મભિઃ કુર્વન્ સનિમિત્તાનિ દેહભૃત્ ।
તત્તત્કર્મફલં ગૃહ્ણન્ ભ્રમતીહ સુખેતરમ્ ॥ ૬॥

ઇત્થં કર્મગતીર્ગચ્છન્ બહ્વભદ્રવહાઃ પુમાન્ ।
આભૂતસમ્પ્લવાત્સર્ગપ્રલયાવશ્નુતેઽવશઃ ॥ ૭॥

ધાતૂપપ્લવ આસન્ને વ્યક્તં દ્રવ્યગુણાત્મકમ્ ।
અનાદિનિધનઃ કાલો હ્યવ્યક્તાયાપકર્ષતિ ॥ ૮॥

શતવર્ષા હ્યનાવૃષ્ટિર્ભવિષ્યત્યુલ્બણા ભુવિ ।
તત્કાલોપચિતોષ્ણાર્કો લોકાંસ્ત્રીન્ પ્રતપિષ્યતિ ॥ ૯॥

પાતાલતલમારભ્ય સઙ્કર્ષણમુખાનલઃ ।
દહન્નૂર્ધ્વશિખો વિષ્વગ્વર્ધતે વાયુનેરિતઃ ॥ ૧૦॥

સાંવર્તકો મેઘગણો વર્ષતિ સ્મ શતં સમાઃ ।
ધારાભિર્હસ્તિહસ્તાભિર્લીયતે સલિલે વિરાટ્ ॥ ૧૧॥

તતો વિરાજમુત્સૃજ્ય વૈરાજઃ પુરુષો નૃપ ।
અવ્યક્તં વિશતે સૂક્ષ્મં નિરિન્ધન ઇવાનલઃ ॥ ૧૨॥

વાયુના હૃતગન્ધા ભૂઃ સલિલત્વાય કલ્પતે ।
સલિલં તદ્ધૃતરસં જ્યોતિષ્ટ્વાયોપકલ્પતે ॥ ૧૩॥

હૃતરૂપં તુ તમસા વાયૌ જ્યોતિઃ પ્રલીયતે ।
હૃતસ્પર્શોઽવકાશેન વાયુર્નભસિ લીયતે ॥ ૧૪॥

કાલાત્મના હૃતગુણં નભ આત્મનિ લીયતે ।
ઇન્દ્રિયાણિ મનો બુદ્ધિઃ સહ વૈકારિકૈર્નૃપ ।
પ્રવિશન્તિ હ્યહઙ્કારં સ્વગુણૈરહમાત્મનિ ॥ ૧૫॥

એષા માયા ભગવતઃ સર્ગસ્થિત્યન્તકારિણી ।
ત્રિવર્ણા વર્ણિતાસ્માભિઃ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૬॥

રાજોવાચ
યથૈતામૈશ્વરીં માયાં દુસ્તરામકૃતાત્મભિઃ ।

તરન્ત્યઞ્જઃ સ્થૂલધિયો મહર્ષ ઇદમુચ્યતામ્ ॥ ૧૭॥

પ્રબુદ્ધ ઉવાચ
કર્માણ્યારભમાણાનાં દુઃખહત્યૈ સુખાય ચ ।
પશ્યેત્પાકવિપર્યાસં મિથુનીચારિણાં નૃણામ્ ॥ ૧૮॥

નિત્યાર્તિદેન વિત્તેન દુર્લભેનાત્મમૃત્યુના ।
ગૃહાપત્યાપ્તપશુભિઃ કા પ્રીતિઃ સાધિતૈશ્ચલૈઃ ॥ ૧૯॥

એવં લોકં પરં વિદ્યાન્નશ્વરં કર્મનિર્મિતમ્ ।
સતુલ્યાતિશયધ્વંસં યથા મણ્ડલવર્તિનામ્ ॥ ૨૦॥

તસ્માદ્ગુરું પ્રપદ્યેત જિજ્ઞાસુઃ શ્રેય ઉત્તમમ્ ।
શાબ્દે પરે ચ નિષ્ણાતં બ્રહ્મણ્યુપશમાશ્રયમ્ ॥ ૨૧॥

તત્ર ભાગવતાન્ ધર્માન્ શિક્ષેદ્ગુર્વાત્મદૈવતઃ ।
અમાયયાનુવૃત્ત્યા યૈસ્તુષ્યેદાત્માઽઽત્મદો હરિઃ ॥ ૨૨॥

સર્વતો મનસોઽસઙ્ગમાદૌ સઙ્ગં ચ સાધુષુ ।
દયાં મૈત્રીં પ્રશ્રયં ચ ભૂતેષ્વદ્ધા યથોચિતમ્ ॥ ૨૩॥

શૌચં તપસ્તિતિક્ષાં ચ મૌનં સ્વાધ્યાયમાર્જવમ્ ।
બ્રહ્મચર્યમહિંસાં ચ સમત્વં દ્વન્દ્વસંજ્ઞયોઃ ॥ ૨૪॥

સર્વત્રાત્મેશ્વરાન્વીક્ષાં કૈવલ્યમનિકેતતામ્ ।
વિવિક્તચીરવસનં સન્તોષં યેન કેનચિત્ ॥ ૨૫॥

શ્રદ્ધાં ભાગવતે શાસ્ત્રેઽનિન્દામન્યત્ર ચાપિ હિ ।
મનો વાક્કર્મદણ્ડં ચ સત્યં શમદમાવપિ ॥ ૨૬॥

શ્રવણં કીર્તનં ધ્યાનં હરેરદ્ભુતકર્મણઃ ।
જન્મકર્મગુણાનાં ચ તદર્થેઽખિલચેષ્ટિતમ્ ॥ ૨૭॥

ઇષ્ટં દત્તં તપો જપ્તં વૃત્તં યચ્ચાત્મનઃ પ્રિયમ્ ।
દારાન્ સુતાન્ ગૃહાન્ પ્રાણાન્ યત્પરસ્મૈ નિવેદનમ્ ॥ ૨૮॥

એવં કૃષ્ણાત્મનાથેષુ મનુષ્યેષુ ચ સૌહૃદમ્ ।
પરિચર્યાં ચોભયત્ર મહત્સુ નૃષુ સાધુષુ ॥ ૨૯॥

પરસ્પરાનુકથનં પાવનં ભગવદ્યશઃ ।
મિથો રતિર્મિથસ્તુષ્ટિર્નિવૃત્તિર્મિથ આત્મનઃ ॥ ૩૦॥

સ્મરન્તઃ સ્મારયન્તશ્ચ મિથોઽઘૌઘહરં હરિમ્ ।
ભક્ત્યા સઞ્જાતયા ભક્ત્યા બિભ્રત્યુત્પુલકાં તનુમ્ ॥ ૩૧॥

ક્વચિદ્રુદન્ત્યચ્યુતચિન્તયા ક્વચિ-
    દ્ધસન્તિ નન્દન્તિ વદન્ત્યલૌકિકાઃ ।
નૃત્યન્તિ ગાયન્ત્યનુશીલયન્ત્યજં
    ભવન્તિ તૂષ્ણીં પરમેત્ય નિર્વૃતાઃ ॥ ૩૨॥

ઇતિ ભાગવતાન્ ધર્માન્ શિક્ષન્ ભક્ત્યા તદુત્થયા ।
નારાયણપરો માયામઞ્જસ્તરતિ દુસ્તરામ્ ॥ ૩૩॥

રાજોવાચ
નારાયણાભિધાનસ્ય બ્રહ્મણઃ પરમાત્મનઃ ।
નિષ્ઠામર્હથ નો વક્તું યૂયં હિ બ્રહ્મવિત્તમાઃ ॥ ૩૪॥

પિપ્પલાયન ઉવાચ
સ્થિત્યુદ્ભવપ્રલયહેતુરહેતુરસ્ય
    યત્સ્વપ્નજાગરસુષુપ્તિષુ સદ્બહિશ્ચ ।
દેહેન્દ્રિયાસુહૃદયાનિ ચરન્તિ યેન
    સઞ્જીવિતાનિ તદવેહિ પરં નરેન્દ્ર ॥ ૩૫॥

નૈતન્મનો વિશતિ વાગુત ચક્ષુરાત્મા
    પ્રાણેન્દ્રિયાણિ ચ યથાનલમર્ચિષઃ સ્વાઃ ।
શબ્દોઽપિ બોધકનિષેધતયાઽઽત્મમૂલ-
    મર્થોક્તમાહ યદૃતે ન નિષેધસિદ્ધિઃ ॥ ૩૬॥

સત્ત્વં રજસ્તમ ઇતિ ત્રિવૃદેકમાદૌ
    સૂત્રં મહાનહમિતિ પ્રવદન્તિ જીવમ્ ।
જ્ઞાનક્રિયાર્થફલરૂપતયોરુશક્તિ
    બ્રહ્મૈવ ભાતિ સદસચ્ચ તયોઃ પરં યત્ ॥ ૩૭॥

નાત્મા જજાન ન મરિષ્યતિ નૈધતેઽસૌ
    ન ક્ષીયતે સવનવિદ્વ્યભિચારિણાં હિ ।
સર્વત્ર શશ્વદનપાય્યુપલબ્ધિમાત્રં
    પ્રાણો યથેન્દ્રિયબલેન વિકલ્પિતં સત્ ॥ ૩૮॥

અણ્ડેષુ પેશિષુ તરુષ્વવિનિશ્ચિતેષુ
    પ્રાણો હિ જીવમુપધાવતિ તત્ર તત્ર ।
સન્ને યદિન્દ્રિયગણેઽહમિ ચ પ્રસુપ્તે
    કૂટસ્થ આશયમૃતે તદનુસ્મૃતિર્નઃ ॥ ૩૯॥

યર્હ્યબ્જનાભચરણૈષણયોરુભક્ત્યા
    ચેતોમલાનિ વિધમેદ્ગુણકર્મજાનિ ।
તસ્મિન્ વિશુદ્ધ ઉપલભ્યત આત્મતત્ત્વં
    સાક્ષાદ્યથામલદૃશોઃ સવિતૃપ્રકાશઃ ॥ ૪૦॥

રાજોવાચ
કર્મયોગં વદત નઃ પુરુષો યેન સંસ્કૃતઃ ।
વિધૂયેહાશુ કર્માણિ નૈષ્કર્મ્યં વિન્દતે પરમ્ ॥ ૪૧॥

એવં પ્રશ્નમૃષીન્ પૂર્વમપૃચ્છં પિતુરન્તિકે ।
નાબ્રુવન્ બ્રહ્મણઃ પુત્રાસ્તત્ર કારણમુચ્યતામ્ ॥ ૪૨॥

આવિર્હોત્ર ઉવાચ
કર્માકર્મવિકર્મેતિ વેદવાદો ન લૌકિકઃ ।
વેદસ્ય ચેશ્વરાત્મત્વાત્તત્ર મુહ્યન્તિ સૂરયઃ ॥ ૪૩॥

પરોક્ષવાદો વેદોઽયં બાલાનામનુશાસનમ્ ।
કર્મમોક્ષાય કર્માણિ વિધત્તે હ્યગદં યથા ॥ ૪૪॥

નાચરેદ્યસ્તુ વેદોક્તં સ્વયમજ્ઞોઽજિતેન્દ્રિયઃ ।
વિકર્મણા હ્યધર્મેણ મૃત્યોર્મૃત્યુમુપૈતિ સઃ ॥ ૪૫॥

વેદોક્તમેવ કુર્વાણો નિઃસઙ્ગોઽર્પિતમીશ્વરે ।
નૈષ્કર્મ્યં લભતે સિદ્ધિં રોચનાર્થા ફલશ્રુતિઃ ॥ ૪૬॥

ય આશુ હૃદયગ્રન્થિં નિર્જિહીર્ષુઃ પરાત્મનઃ ।
વિધિનોપચરેદ્દેવં તન્ત્રોક્તેન ચ કેશવમ્ ॥ ૪૭॥

લબ્ધાનુગ્રહ આચાર્યાત્તેન સન્દર્શિતાગમઃ ।
મહાપુરુષમભ્યર્ચેન્મૂર્ત્યાભિમતયાઽઽત્મનઃ ॥ ૪૮॥

શુચિઃ સમ્મુખમાસીનઃ પ્રાણસંયમનાદિભિઃ ।
પિણ્ડં વિશોધ્ય સન્ન્યાસકૃતરક્ષોઽર્ચયેદ્ધરિમ્ ॥ ૪૯॥

અર્ચાદૌ હૃદયે ચાપિ યથા લબ્ધોપચારકૈઃ ।
દ્રવ્યક્ષિત્યાત્મલિઙ્ગાનિ નિષ્પાદ્ય પ્રોક્ષ્ય ચાસનમ્ ॥ ૫૦॥

પાદ્યાદીનુપકલ્પ્યાથ સન્નિધાપ્ય સમાહિતઃ ।
હૃદાદિભિઃ કૃતન્યાસો મૂલમન્ત્રેણ ચાર્ચયેત્ ॥ ૫૧॥

સાઙ્ગોપાઙ્ગાં સપાર્ષદાં તાં તાં મૂર્તિં સ્વમન્ત્રતઃ ।
પાદ્યાર્ઘ્યાચમનીયાદ્યૈઃ સ્નાનવાસોવિભૂષણૈઃ ॥ ૫૨॥

ગન્ધમાલ્યાક્ષતસ્રગ્ભિર્ધૂપદીપોપહારકૈઃ ।
સાઙ્ગં સમ્પૂજ્ય વિધિવત્સ્તવૈઃ સ્તુત્વા નમેદ્ધરિમ્ ॥ ૫૩॥

આત્માનં તન્મયં ધ્યાયન્ મૂર્તિં સમ્પૂજયેદ્ધરેઃ ।
શેષામાધાય શિરસિ સ્વધામ્ન્યુદ્વાસ્ય સત્કૃતમ્ ॥ ૫૪॥

એવમગ્ન્યર્કતોયાદાવતિથૌ હૃદયે ચ યઃ ।
યજતીશ્વરમાત્માનમચિરાન્મુચ્યતે હિ સઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે તૃતીયોઽધ્યાયઃ ॥ ૩॥

## ચતુર્થોઽધ્યાયઃ - ૧૧.૪

રાજોવાચ
યાનિ યાનીહ કર્માણિ યૈર્યૈઃ સ્વચ્છન્દજન્મભિઃ ।
ચક્રે કરોતિ કર્તા વા હરિસ્તાનિ બ્રુવન્તુ નઃ ॥ ૧॥

દ્રુમિલ ઉવાચ
યો વા અનન્તસ્ય ગુણાનનન્તા-
    નનુક્રમિષ્યન્ સ તુ બાલબુદ્ધિઃ ।
રજાંસિ ભૂમેર્ગણયેત્કથઞ્ચિત્
    કાલેન નૈવાખિલશક્તિધામ્નઃ ॥ ૨॥

ભૂતૈર્યદા પઞ્ચભિરાત્મસૃષ્ટૈઃ
    પુરં વિરાજં વિરચય્ય તસ્મિન્ ।
સ્વાંશેન વિષ્ટઃ પુરુષાભિધાન-
    મવાપ નારાયણ આદિદેવઃ ॥ ૩॥

યત્કાય એષ ભુવનત્રયસન્નિવેશો
    યસ્યેન્દ્રિયૈસ્તનુભૃતામુભયેન્દ્રિયાણિ ।
જ્ઞાનં સ્વતઃ શ્વસનતો બલમોજ ઈહા
    સત્ત્વાદિભિઃ સ્થિતિલયોદ્ભવ આદિ કર્તા ॥ ૪॥

આદાવભૂચ્છતધૃતી રજસાસ્ય સર્ગે
    વિષ્ણુઃ સ્થિતૌ ક્રતુપતિર્દ્વિજધર્મસેતુઃ ।
રુદ્રોઽપ્યયાય તમસા પુરુષઃ સ આદ્ય
    ઇત્યુદ્ભવસ્થિતિલયાઃ સતતં પ્રજાસુ ॥ ૫॥

ધર્મસ્ય દક્ષદુહિતર્યજનિષ્ટ મૂર્ત્યાં
    નારાયણો નરઋષિપ્રવરઃ પ્રશાન્તઃ ।
નૈષ્કર્મ્યલક્ષણમુવાચ ચચાર કર્મ
    યોઽદ્યાપિ ચાસ્ત ઋષિવર્યનિષેવિતાઙ્ઘ્રિઃ ॥ ૬॥

ઇન્દ્રો વિશઙ્ક્ય મમ ધામ જિઘૃક્ષતીતિ
    કામં ન્યયુઙ્ક્ત સગણં સ બદર્યુપાખ્યમ્ ।
ગત્વાપ્સરોગણવસન્તસુમન્દવાતૈઃ
    સ્ત્રીપ્રેક્ષણેષુભિરવિધ્યદતન્મહિજ્ઞઃ ॥ ૭॥

વિજ્ઞાય શક્રકૃતમક્રમમાદિદેવઃ
    પ્રાહ પ્રહસ્ય ગતવિસ્મય એજમાનાન્ ।
મા ભૈષ્ટ ભો મદન મારુત દેવવધ્વો
    ગૃહ્ણીત નો બલિમશૂન્યમિમં કુરુધ્વમ્ ॥ ૮॥

ઇત્થં બ્રુવત્યભયદે નરદેવ દેવાઃ
    સવ્રીડનમ્રશિરસઃ સઘૃણં તમૂચુઃ ।
નૈતદ્વિભો ત્વયિ પરેઽવિકૃતે વિચિત્રં
    સ્વારામધીરનિકરાનતપાદપદ્મે ॥ ૯॥

ત્વાં સેવતાં સુરકૃતા બહવોઽન્તરાયાઃ
    સ્વૌકો વિલઙ્ઘ્ય પરમં વ્રજતાં પદં તે ।
નાન્યસ્ય બર્હિષિ બલીન્ દદતઃ સ્વભાગાન્
    ધત્તે પદં ત્વમવિતા યદિ વિઘ્નમૂર્ધ્નિ ॥ ૧૦॥

ક્ષુત્તૃટ્ત્રિકાલગુણમારુતજૈહ્વશૈશ્ના-
    નસ્માનપારજલધીનતિતીર્ય કેચિત્ ।

ક્રોધસ્ય યાન્તિ વિફલસ્ય વશં પદે ગો-
  ર્મજ્જન્તિ દુશ્ચરતપશ્ચ વૃથોત્સૃજન્તિ ॥ ૧૧॥

ઇતિ પ્રગૃણતાં તેષાં સ્ત્રિયોઽત્યદ્ભુતદર્શનાઃ ।
દર્શયામાસ શુશ્રૂષાં સ્વર્ચિતાઃ કુર્વતીર્વિભુઃ ॥ ૧૨॥

તે દેવાનુચરા દૃષ્ટ્વા સ્ત્રિયઃ શ્રીરિવ રૂપિણીઃ ।
ગન્ધેન મુમુહુસ્તાસાં રૂપૌદાર્યહતશ્રિયઃ ॥ ૧૩॥

તાનાહ દેવદેવેશઃ પ્રણતાન્ પ્રહસન્નિવ ।
આસામેકતમાં વૃઙ્ધ્વં સવર્ણાં સ્વર્ગભૂષણામ્ ॥ ૧૪॥

ઓમિત્યાદેશમાદાય નત્વા તં સુરવન્દિનઃ ।
ઉર્વશીમપ્સરઃશ્રેષ્ઠાં પુરસ્કૃત્ય દિવં યયુઃ ॥ ૧૫॥

ઇન્દ્રાયાનમ્ય સદસિ શ ૃણ્વતાં ત્રિદિવૌકસામ્ ।
ઊચુર્નારાયણબલં શક્રસ્તત્રાસ વિસ્મિતઃ ॥ ૧૬॥

હંસસ્વરૂપ્યવદદચ્યુત આત્મયોગં
  દત્તઃ કુમાર ઋષભો ભગવાન્ પિતા નઃ ।
વિષ્ણુઃ શિવાય જગતાં કલયાવતિર્ણ-
  સ્તેનાહૃતા મધુભિદા શ્રુતયો હયાસ્યે ॥ ૧૭॥

ગુપ્તોઽપ્યયે મનુરિલૌષધયશ્ચ માત્સ્યે
  ક્રૌડે હતો દિતિજ ઉદ્ધરતામ્ભસઃ ક્ષ્મામ્ ।
કૌર્મે ધૃતોઽદ્રિરમૃતોન્મથને સ્વપૃષ્ઠે
  ગ્રાહાત્પ્રપન્નમિભરાજમમુઞ્ચદાર્તમ્ ॥ ૧૮॥

સંસ્તુન્વતોઽબ્ધિપતિતાન્ શ્રમણાનૃષીંશ્ચ
  શક્રં ચ વૃત્રવધતસ્તમસિ પ્રવિષ્ટમ્ ।
દેવસ્ત્રિયોઽસુરગૃહે પિહિતા અનાથા
  જઘ્નેઽસુરેન્દ્રમભયાય સતાં નૃસિંહે ॥ ૧૯॥

દેવાસુરે યુધિ ચ દૈત્યપતીન્ સુરાર્થે
  હત્વાન્તરેષુ ભુવનાન્યદધાત્કલાભિઃ ।
ભૂત્વાથ વામન ઇમામહરદ્બલેઃ ક્ષ્માં
  યાચ્ઞાચ્છલેન સમદાદદિતેઃ સુતેભ્યઃ ॥ ૨૦॥

નિઃક્ષત્રિયામકૃત ગાં ચ ત્રિઃસપ્તકૃત્વો

રામસ્તુ હૈહયકુલાપ્યયભાર્ગવાગ્નિઃ ।
સોઽબ્ધિં બબન્ધ દશવક્ત્રમહન્ સલઙ્કં
સીતાપતિર્જયતિ લોકમલઘ્નકીર્તિઃ ॥ ૨૧॥

ભૂમેર્ભરાવતરણાય યદુષ્વજન્મા
જાતઃ કરિષ્યતિ સુરૈરપિ દુષ્કરાણિ ।
વાદૈર્વિમોહયતિ યજ્ઞકૃતોઽતદર્હાન્
શૂદ્રાન્ કલૌ ક્ષિતિભુજો ન્યહનિષ્યદન્તે ॥ ૨૨॥

એવંવિધાનિ કર્માણિ જન્માનિ ચ જગત્પતેઃ ।
ભૂરીણિ ભૂરિયશસો વર્ણિતાનિ મહાભુજ ॥ ૨૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## પઞ્ચમોઽધ્યાયઃ - ૧૧.૫

રાજોવાચ
ભગવન્તં હરિં પ્રાયો ન ભજન્ત્યાત્મવિત્તમાઃ ।
તેષામશાન્તકામાનાં કા નિષ્ઠાવિજિતાત્મનામ્ ॥ ૧॥

ચમસ ઉવાચ
મુખબાહૂરુપાદેભ્યઃ પુરુષસ્યાશ્રમૈઃ સહ ।
ચત્વારો જજ્ઞિરે વર્ણા ગુણૈર્વિપ્રાદયઃ પૃથક્ ॥ ૨॥

ય એષાં પુરુષં સાક્ષાદાત્મપ્રભવમીશ્વરમ્ ।
ન ભજન્ત્યવજાનન્તિ સ્થાનાદ્ભ્રષ્ટાઃ પતન્ત્યધઃ ॥ ૩॥

દૂરે હરિકથાઃ કેચિદ્દૂરે ચાચ્યુતકીર્તનાઃ ।
સ્ત્રિયઃ શૂદ્રાદયશ્ચૈવ તેઽનુકમ્પ્યા ભવાદૃશામ્ ॥ ૪॥

વિપ્રો રાજન્યવૈશ્યૌ ચ હરેઃ પ્રાપ્તાઃ પદાન્તિકમ્ ।
શ્રૌતેન જન્મનાથાપિ મુહ્યન્ત્યામ્નાયવાદિનઃ ॥ ૫॥

કર્મણ્યકોવિદાઃ સ્તબ્ધા મૂર્ખાઃ પણ્ડિતમાનિનઃ ।
વદન્તિ ચાટુકાન્ મૂઢા યયા માધ્વ્યા ગિરોત્સુકાઃ ॥ ૬॥

રજસા ઘોરસઙ્કલ્પાઃ કામુકા અહિમન્યવઃ ।

દામ્ભિકા માનિનઃ પાપા વિહસન્ત્યચ્યુતપ્રિયાન્ ॥ ૭॥

વદન્તિ તેઽન્યોન્યમુપાસિતસ્ત્રિયો
    ગૃહેષુ મૈથુન્યપરેષુ ચાશિષઃ ।
યજન્ત્યસૃષ્ટાન્નવિધાનદક્ષિણં
    વૃત્ત્યૈ પરં ઘ્નન્તિ પશૂનતદ્વિદઃ ॥ ૮॥

શ્રિયા વિભૂત્યાભિજનેન વિદ્યયા
    ત્યાગેન રૂપેણ બલેન કર્મણા ।
જાતસ્મયેનાન્ધધિયઃ સહેશ્વરાન્
    સતોઽવમન્યન્તિ હરિપ્રિયાન્ ખલાઃ ॥ ૯॥

સર્વેષુ શશ્વત્તનુભૃત્સ્વવસ્થિતં
    યથા ખમાત્માનમભીષ્ટમીશ્વરમ્ ।
વેદોપગીતં ચ ન શ‍ૃણ્વતેઽબુધા
    મનોરથાનાં પ્રવદન્તિ વાર્તયા ॥ ૧૦॥

લોકે વ્યવાયામિષમદ્યસેવા
    નિત્યાસ્તુ જન્તોર્ન હિ તત્ર ચોદના ।
વ્યવસ્થિતિસ્તેષુ વિવાહયજ્ઞ-
    સુરાગ્રહૈરાસુ નિવૃત્તિરિષ્ટા ॥ ૧૧॥

ધનં ચ ધર્મૈકફલં યતો વૈ
    જ્ઞાનં સવિજ્ઞાનમનુપ્રશાન્તિ ।
ગૃહેષુ યુઞ્જન્તિ કલેવરસ્ય
    મૃત્યું ન પશ્યન્તિ દુરન્તવીર્યમ્ ॥ ૧૨॥

યદ્ઘ્રાણભક્ષો વિહિતઃ સુરાયા-
    સ્તથા પશોરાલભનં ન હિંસા ।
એવં વ્યવાયઃ પ્રજયા ન રત્યા
    ઇમં વિશુદ્ધં ન વિદુઃ સ્વધર્મમ્ ॥ ૧૩॥

યે ત્વનેવંવિદોઽસન્તઃ સ્તબ્ધાઃ સદભિમાનિનઃ ।
પશૂન્ દ્રુહ્યન્તિ વિશ્રબ્ધાઃ પ્રેત્ય ખાદન્તિ તે ચ તાન્ ॥ ૧૪॥

દ્વિષન્તઃ પરકાયેષુ સ્વાત્માનં હરિમીશ્વરમ્ ।
મૃતકે સાનુબન્ધેઽસ્મિન્ બદ્ધસ્નેહાઃ પતન્ત્યધઃ ॥ ૧૫॥

યે કૈવલ્યમસમ્પ્રાપ્તા યે ચાતીતાશ્ચ મૂઢતામ્ ।
ત્રૈવર્ગિકા હ્યક્ષણિકા આત્માનં ઘાતયન્તિ તે ॥ ૧૬॥

એત આત્મહનોઽશાન્તા અજ્ઞાને જ્ઞાનમાનિનઃ ।
સીદન્ત્યકૃતકૃત્યા વૈ કાલધ્વસ્તમનોરથાઃ ॥ ૧૭॥

હિત્વાત્યાયાસરચિતા ગૃહાપત્યસુહૃચ્છ્રિયઃ ।
તમો વિશન્ત્યનિચ્છન્તો વાસુદેવપરાઙ્મુખાઃ ॥ ૧૮॥

રાજોવાચ
કસ્મિન્ કાલે સ ભગવાન્ કિં વર્ણઃ કીદૃશો નૃભિઃ ।
નામ્ના વા કેન વિધિના પૂજ્યતે તદિહોચ્યતામ્ ॥ ૧૯॥

કરભાજન ઉવાચ
કૃતં ત્રેતા દ્વાપરં ચ કલિરિત્યેષુ કેશવઃ ।
નાનાવર્ણાભિધાકારો નાનૈવ વિધિનેજ્યતે ॥ ૨૦॥

કૃતે શુક્લશ્ચતુર્બાહુર્જટિલો વલ્કલામ્બરઃ ।
કૃષ્ણાજિનોપવીતાક્ષાન્ બિભ્રદ્દણ્ડકમણ્ડલૂ ॥ ૨૧॥

મનુષ્યાસ્તુ તદા શાન્તા નિર્વૈરાઃ સુહૃદઃ સમાઃ ।
યજન્તિ તપસા દેવં શમેન ચ દમેન ચ ॥ ૨૨॥

હંસઃ સુપર્ણો વૈકુણ્ઠો ધર્મો યોગેશ્વરોઽમલઃ ।
ઈશ્વરઃ પુરુષોઽવ્યક્તઃ પરમાત્મેતિ ગીયતે ॥ ૨૩॥

ત્રેતાયાં રક્તવર્ણોઽસૌ ચતુર્બાહુસ્ત્રિમેખલઃ ।
હિરણ્યકેશસ્ત્રય્યાત્મા સ્રુક્સ્રુવાદ્યુપલક્ષણઃ ॥ ૨૪॥

તં તદા મનુજા દેવં સર્વદેવમયં હરિમ્ ।
યજન્તિ વિદ્યયા ત્રય્યા ધર્મિષ્ઠા બ્રહ્મવાદિનઃ ॥ ૨૫॥

વિષ્ણુર્યજ્ઞઃ પૃશ્નિગર્ભઃ સર્વદેવ ઉરુક્રમઃ ।
વૃષાકપિર્જયન્તશ્ચ ઉરુગાય ઇતીર્યતે ॥ ૨૬॥

દ્વાપરે ભગવાઞ્શ્યામઃ પીતવાસા નિજાયુધઃ ।
શ્રીવત્સાદિભિરઙ્કૈશ્ચ લક્ષણૈરુપલક્ષિતઃ ॥ ૨૭॥

તં તદા પુરુષં મર્ત્યા મહારાજોપલક્ષણમ્ ।
યજન્તિ વેદતન્ત્રાભ્યાં પરં જિજ્ઞાસવો નૃપ ॥ ૨૮॥

નમસ્તે વાસુદેવાય નમઃ સઙ્કર્ષણાય ચ ।
પ્રદ્યુમ્નાયાનિરુદ્ધાય તુભ્યં ભગવતે નમઃ ॥ ૨૯॥

નારાયણાય ઋષયે પુરુષાય મહાત્મને ।
વિશ્વેશ્વરાય વિશ્વાય સર્વભૂતાત્મને નમઃ ॥ ૩૦॥

ઇતિ દ્વાપર ઉર્વીશ સ્તુવન્તિ જગદીશ્વરમ્ ।
નાનાતન્ત્રવિધાનેન કલાવપિ યથા શ‍ૃણુ ॥ ૩૧॥

કૃષ્ણવર્ણં ત્વિષાકૃષ્ણં સાઙ્ગોપાઙ્ગાસ્ત્રપાર્ષદમ્ ।
યજ્ઞૈઃ સઙ્કીર્તનપ્રાયૈર્યજન્તિ હિ સુમેધસઃ ॥ ૩૨॥

ધ્યેયં સદા પરિભવઘ્નમભીષ્ટદોહં
    તીર્થાસ્પદં શિવવિરિઞ્ચિનુતં શરણ્યમ્ ।
ભૃત્યાર્તિહં પ્રણતપાલ ભવાબ્ધિપોતં
    વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૩૩॥

ત્યક્ત્વા સુદુસ્ત્યજસુરેપ્સિતરાજ્યલક્ષ્મીં
    ધર્મિષ્ઠ આર્યવચસા યદગાદરણ્યમ્ ।
માયામૃગં દયિતયેપ્સિતમન્વધાવ-
    દ્વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૩૪॥

એવં યુગાનુરૂપાભ્યાં ભગવાન્ યુગવર્તિભિઃ ।
મનુજૈરિજ્યતે રાજન્ શ્રેયસામીશ્વરો હરિઃ ॥ ૩૫॥

કલિં સભાજયન્ત્યાર્યા ગુણજ્ઞાઃ સારભાગિનઃ ।
યત્ર સઙ્કીર્તનેનૈવ સર્વસ્વાર્થોઽભિલભ્યતે ॥ ૩૬॥

ન હ્યતઃ પરમો લાભો દેહિનાં ભ્રામ્યતામિહ ।
યતો વિન્દેત પરમાં શાન્તિં નશ્યતિ સંસૃતિઃ ॥ ૩૭॥

કૃતાદિષુ પ્રજા રાજન્ કલાવિચ્છન્તિ સમ્ભવમ્ ।
કલૌ ખલુ ભવિષ્યન્તિ નારાયણપરાયણાઃ ॥ ૩૮॥

ક્વચિત્ક્વચિન્મહારાજ દ્રવિડેષુ ચ ભૂરિશઃ ।
તામ્રપર્ણી નદી યત્ર કૃતમાલા પયસ્વિની ॥ ૩૯॥

કાવેરી ચ મહાપુણ્યા પ્રતીચી ચ મહાનદી ।
યે પિબન્તિ જલં તાસાં મનુજા મનુજેશ્વર ।

પ્રાયો ભક્તા ભગવતિ વાસુદેવેઽમલાશયાઃ ॥ ૪૦॥

દેવર્ષિભૂતાપ્તનૃણાં પિતૃણાં
    ન કિઙ્કરો નાયમૃણી ચ રાજન્ ।
સર્વાત્મના યઃ શરણં શરણ્યં
    ગતો મુકુન્દં પરિહૃત્ય કર્તમ્ ॥ ૪૧॥

સ્વપાદમૂલં ભજતઃ પ્રિયસ્ય
    ત્યક્તાન્યભાવસ્ય હરિઃ પરેશઃ ।
વિકર્મ યચ્ચોત્પતિતં કથઞ્ચિ-
    દ્ધુનોતિ સર્વં હૃદિ સન્નિવિષ્ટઃ ॥ ૪૨॥

નારદ ઉવાચ
ધર્માન્ ભાગવતાનિત્થં શ્રુત્વાથ મિથિલેશ્વરઃ ।
જાયન્તેયાન્ મુનીન્ પ્રીતઃ સોપાધ્યાયો હ્યપૂજયત્ ॥ ૪૩॥

તતોઽન્તર્દધિરે સિદ્ધાઃ સર્વલોકસ્ય પશ્યતઃ ।
રાજા ધર્માનુપાતિષ્ઠન્નવાપ પરમાં ગતિમ્ ॥ ૪૪॥

ત્વમપ્યેતાન્ મહાભાગ ધર્માન્ ભાગવતાન્ શ્રુતાન્ ।
આસ્થિતઃ શ્રદ્ધયા યુક્તો નિઃસઙ્ગો યાસ્યસે પરમ્ ॥ ૪૫॥

યુવયોઃ ખલુ દમ્પત્યોર્યશસા પૂરિતં જગત્ ।
પુત્રતામગમદ્યદ્વાં ભગવાનીશ્વરો હરિઃ ॥ ૪૬॥

દર્શનાલિઙ્ગનાલાપૈઃ શયનાસનભોજનૈઃ ।
આત્મા વાં પાવિતઃ કૃષ્ણે પુત્રસ્નેહં પ્રકુર્વતોઃ ॥ ૪૭॥

વૈરેણ યં નૃપતયઃ શિશુપાલપૌણ્ડ્ર-
    શાલ્વાદયો ગતિવિલાસવિલોકનાદ્યૈઃ ।
ધ્યાયન્ત આકૃતધિયઃ શયનાસનાદૌ
    તત્સામ્યમાપુરનુરક્તધિયાં પુનઃ કિમ્ ॥ ૪૮॥

માપત્યબુદ્ધિમકૃથાઃ કૃષ્ણે સર્વાત્મનીશ્વરે ।
માયામનુષ્યભાવેન ગૂઢૈશ્વર્યે પરેઽવ્યયે ॥ ૪૯॥

ભૂભારાસુરરાજન્યહન્તવે ગુપ્તયે સતામ્ ।
અવતીર્ણસ્ય નિર્વૃત્યૈ યશો લોકે વિતન્યતે ॥ ૫૦॥

શ્રીશુક ઉવાચ
એતચ્છ્રુત્વા મહાભાગો વસુદેવોઽતિવિસ્મિતઃ ।
દેવકી ચ મહાભાગા જહતુર્મોહમાત્મનઃ ॥ ૫૧॥

ઇતિહાસમિમં પુણ્યં ધારયેદ્યઃ સમાહિતઃ ।
સ વિધૂયેહ શમલં બ્રહ્મભૂયાય કલ્પતે ॥ ૫૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

જાયન્તેયગીતા સમાપ્તા ।

Bhagavata Purana skandha 11, adhyAya 2-5
Conversation between nImI of videhas and navayogI (nine sons of Rishabha)
kavi, hari, antarikSha, prabuddha, pippalAyana, AvirhortA, drumila, chamasa,
and karabhAjana.

Proofread by PSA Easwaran

---

*Jayanteya Gita from Shrimad Bhagavata*
pdf was typeset on December 29, 2022

Please send corrections to *sanskrit@cheerful.com*